# माध्यमिकशिक्षापाठ्यक्रमः
# फलितज्योतिषम्

**कक्षा : ९/१०** **विषयसङ्केतः : (कक्षा ९ Faj. 401 कक्षा १० Faj. 402)**

**पाठ्यघण्टा : ५** **वार्षिककार्यघण्टा : १६०**

## १. परिचयः

फलितज्योतिषविषयस्य पाठ्यक्रमः फलग्रन्थाधारितविषयक्षेत्राणाम्, सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयराष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गनिर्देशानुसारेण विद्यालयशिक्षाया माध्यमिकरस्तरे (नवम्यां दशम्याञ्च कक्षयोः) फलितज्योतिषविषयस्यैतस्मिन् पाठ्यक्रमे मुहूर्त-जातक-प्रश्न-ताजिक-सामुद्रिकशास्त्राणामाधारेण विषयवस्तूनां बोधस्तेषामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे फलितज्योतिषमितोऽपि व्यावहारिकं निर्माय विद्यार्थिनां रुच्यकाङ्क्षे परिपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विस्तार्य उपयुक्तता सुनिश्चिता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषय उच्चशिक्षाया आधारोऽपि निर्मात्स्यते इति चापेक्षितं वर्तते ।

नेपालदेशे धार्मिकदृष्ट्या, व्यावहारिकदृष्ट्या सांस्कृतिकदृष्ट्या च सम्पाद्यमानानि समस्तानि कार्याणि फलितज्योतिषसम्बद्धानि सन्ति । फलितज्योतिषशास्त्रं ननु संहिताहोरेति स्कन्धयोः सम्मिलितं रूपं वर्तते । संहितास्कन्धे ज्योतिषस्य समग्रं स्वरूपं प्रतिपादितं भवति । विशेषतोऽत्रग्रहनक्षत्रादीनां चारवशेन प्राकृतिपरिवर्तनेन च मानवजीवने विश्वब्रह्माण्डे च जनित-जायमान-जनिष्यमाण-घटनानां परिवर्तमानानां तथा व्यवहारोपयोगिनां सर्वेषामपि विषयाणां सूक्ष्माध्ययनं विधीयते । मुहूर्त-वास्तु-गोचर-संस्कार-यात्रा-ग्रहचारफलवर्णनादिविषयास्तु शास्त्रस्यास्य स्वल्पतममेव महिमानं प्रकटयन्ति । शास्त्रमिदं ज्योतिषविषयकाणां सकलविषयवस्तूनां प्रतिपादकं विद्यते । होरास्कन्धे तु जातकशास्त्रम्, ताजिकशास्त्रम्, सामुद्रिकशास्त्रम्, प्रश्नशास्त्रमित्यादीनि शास्त्राणि परिगण्यन्ते । तत्सम्बद्धानां विषयाणां विवेचने सूक्ष्मातिसूक्ष्मं यथार्थपरकं वर्णनं तत्र समुपलभ्यते । अनयोर्द्वयोरपि स्कन्धयोर्यथार्थस्थितिबोधनाय सिद्धान्तज्योतिषवर्णितं ग्रहस्पष्टीकरणम्, दिग्देशकालपरिज्ञानम्, ग्रहणम्, ग्रहोदयास्तादिपरिज्ञानम्, ग्रहगणितन्तु ज्योतिषशास्त्रस्यात्मस्वरूपमेव दृश्यते । गणितरहितं ज्योतिषं तु पङ्गुरिवाऽऽभाति । अतोऽत्र सिद्धान्त-संहिता-होराभिः पुष्पितस्य फलितस्य च ज्योतिषशास्त्रस्य एतादृशं स्वरूपं संस्मृत्य फलितज्योतिषविषयकः पाठ्यक्रमोऽयं समायोजितः । विद्यालयशिक्षायाः माध्यमिकस्तरस्य नवमदशमकक्षयोः फलितज्योतिषविषयपिपठिष्यमाणानां छात्राणां कृते संहिता-होराविषयैः समलङ्कृतो ग्रहगणितादिविषयैश्च सुसज्जित एष पाठ्यक्रमो फलितज्योतिषीयविषयज्ञानाय महानुपयोगी सफलश्च भविष्यतीति नितरामाशास्यते । पाठ्यक्रमस्यास्य माध्यमेन उच्चशिक्षाया आधारभूमेर्निर्माणं भविष्यतीति चापेक्ष्यते ।

परिचयः, स्तरानुगतयोग्यता, कक्षागतशिक्षणोपलब्धिः, विषयवस्तुनः क्षेत्रक्रमौ, परियोजनाकार्यम्, शिक्षणसहजीकरणप्रक्रिया, विद्यार्थिमूल्याङ्कनविधिश्चेति शीर्षकेषु विभज्य पाठ्यक्रमोऽयं निर्मितो वर्तते । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतमौचित्यम्, पाठ्यक्रमे विद्यमानां मुख्यविशेषतां, पाठ्यक्रमस्य स्वरूपं च प्रदर्श्य परिचयः प्रस्तुतो वर्तते । अपेक्षितं वैषयिकं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, कार्यतत्परताञ्च विचार्य एतस्याः क्रियात्मकस्वरूपे सक्षमता प्रस्तुता वर्तते । शिक्षणस्य स्तरम्, योग्यताया विशिष्टविस्तारेण शिक्षणोपलब्धिः निर्धारिता वर्तते । योग्यतायाः, पूर्वकक्षाभिः सह लम्बीयसन्तुलनस्य चाधारेण विषयवस्तुनः क्षेत्रक्रमौ निर्दिष्टौ वर्तेते । विषयगतां विशिष्टतां मौलिकताञ्च संयोज्य शिक्षणसहजीकरणाय विधिः प्रस्तुतो वर्तते । निर्माणात्मकस्य निर्णयात्मकस्य च मूल्याङ्कनस्य विधिमुल्लिख्य विद्यार्थिनां मूल्याङ्कनपद्धतिर्व्यवस्थिता वर्तते ।

**२. स्तरानुगतयोग्यताः**

**माध्यमिकस्तरस्य ९-१० कक्षयोः फलितज्योतिषविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु सक्षमा भविष्यन्ति -**

१. नेपालदेशीयपञ्चाङ्गस्य सम्यक् प्रयोगे
२. व्यवहारे प्रयोज्यमानानां ज्योतिषीयविषयाणां शुभमुहूर्तनिर्धारणे
३. जन्मपत्रिकां निर्माय जातकशास्त्रोक्तविधिना शुभाशुभफलविवेचने
४. लग्नपत्रिकालेखने
५. सामुद्रिकशास्त्रोक्तदिशा शुभाशुभफलकथने
६. प्रश्नशास्त्रोक्तविधिना शुभाशुभफलविवेचने
७. ताजिकसिद्धान्तानुसारेण सामान्यवर्षफलकथने
८. सन्दर्भविषयाणामवबोधने निर्दिष्टविषयाणामभिव्यक्तीकरणे चेति ।

**३. कक्षागतशिक्षणोपलब्धयः**

**माध्यमिकस्तरस्य नवमकक्षायां फलितज्योतिषविषयमधीत्य छात्रा अधोनिर्दिष्टविषयेषु सक्षमा भविष्यन्ति -**

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. ज्योतिषसम्बद्धाधारभूतविषयज्ञाने पञ्चाङ्गज्ञाने च | १.१ नेपालदेशीयपञ्चाङ्गमनुसृत्य तिथिवारनक्षत्रयोगकरणादीनां ज्ञाने<br>१.२ नक्षत्राणां स्थिरादिसंज्ञानिर्धारणे<br>१.३ सूर्यादिग्रहाणामुच्चनीचमूलत्रिकोण-राशिबोधने<br>१.४ वरवधूमेलापकचक्रानुसारेण गुणसंख्याकथने<br>१.५ प्रचलितपञ्चाङ्गाधारेण विवाहव्रतबन्धयोः कालनिर्धारणे<br>१.६ गोचरानुसारेण शनिदशायाः शुभाशुभफलवर्णने |
| २. निर्दिष्टानां कृत्यविशेषाणां संस्काराणाञ्च मुहूर्तनिर्धारणे, कार्यानुरूपं समयसमीक्षणे च | २.१ निर्दिष्टानां कृत्यविशेषाणां संस्काराणाञ्च शुभाशुभमुहूर्तसम्बद्ध-श्लोकानां शुद्धोच्चारणे<br>२.२ निर्धारितानां मुहूर्तसम्बद्धश्लोकानामर्थावबोधने<br>२.३ निर्दिष्टानां कृत्यविशेषाणां संस्काराणाञ्चशुभाशुभमुहूर्त-निर्धारणे<br>२.४ निर्धारितानां कृत्यविशेषाणां संस्काराणाञ्च शुभाशुभमुहूर्तानां कार्यानुरूपं समयसमीक्षणे |
| ३. सामान्यजन्मपत्रिकानिर्माणे | ३.१ इष्टकालसाधने<br>३.२ भयातभभोगसाधनपूर्वकं नामाद्याक्षरनिर्धारणे<br>३.३ सारणीतो लग्नानयने<br>३.४ ग्रहस्पष्टीकरणे<br>३.५ नक्षत्रदशासाधने<br>३.६ आदर्शजन्मपत्रिकानिर्माणे |
| ४. जन्मपत्रिकया जातकस्य सामान्यफलवर्णने | ४.१ लग्नादिद्वादशभावानां शुभाशुभफलविवेचने<br>४.२ नक्षत्रदशाफलवर्णने<br>४.३ जातकस्य स्वरूपकथने<br>४.४ जातकस्यारिष्टविवेचने |
| ५. लग्नपत्रिकालेखने | ५.१ पञ्चाङ्गमनुसृत्य लग्नसमयनिर्धारणे<br>५.२ व्रतपत्रिकालेखने<br>५.३ विवाहपत्रिकालेखने |
| ६. सामुद्रिकशास्त्रोक्तविधिना शुभाशुभफलवर्णने | ६.१ अङ्गलक्षणानुरूपं शुभाशुभफलकथने<br>६.२ शरीरस्थचिह्नानुसारं शुभाशुभफलकथने<br>६.३ हस्त-भालरेखानुरूपं शुभाशुभफलकथने |

**माध्यमिकस्तरस्य दशमकक्षायां फलितज्योतिषविषयमधीत्य छात्रा अधोनिर्दिष्टविषयेषु सक्षमा भविष्यन्ति -**

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १.ग्रहगतिवशाद् गोचरफलवर्णने ज्योतिषसम्बद्धाधारभूतविषयज्ञाने पञ्चाङ्गज्ञाने च | १.१ सूर्यादिनवग्रहाणां गोचरफलसम्बद्धानां श्लोकानां शुद्धोच्चारणे<br>१.२ सूर्यादिग्रहाणां गोचरफलसम्बद्धश्लोकानामर्थबोधने<br>१.३ सूर्यादिग्रहाणां शुभाशुभगोचरफलविश्लेषणे<br>१.४ ग्रहणफलविवेचने<br>१.५ नवग्रहाणां रत्नकथने<br>१.६ पलभाक्षांशदेशान्तरक्रान्त्यंशचरखण्डानां परिचयप्रकाशने<br>१.७ नेपालदेशीयपञ्चाङ्गमनुसृत्य संवत्सर-संक्रान्ति-विषुवत्-ग्रहणफलकथने |
| २.यात्रा-गृहनिर्माण-गृहप्रवेशसम्बद्धविषयाणां शुभमुहूर्तनिर्धारणे | २.१ निर्दिष्टमुहूर्तसम्बद्धश्लोकानां शुद्धोच्चारणे<br>२.२ निर्दिष्टमुहूर्तसम्बद्धश्लोकानामर्थबोधने<br>२.३ निर्दिष्टमुहूर्तनिर्धारणे<br>२.४ निर्दिष्टमुहूर्तानां त्याज्यविषयविश्लेषणे<br>२.५ तिथि-वार-नक्षत्रदोहदकथने<br>२.६ वृषवास्तु-कलशचक्रविश्लेषणे<br>२.७ राहुमुखनिर्धारणे |
| ३. षड्वर्ग-कुण्डलीयुक्तजन्मपत्रिकानिर्माणे | ३.१ प्रामाणिकस्थानीयसमयान्तरसंज्ञानपूर्वकमिष्टकालसाधने<br>३.२ विविधावस्थासु नक्षत्रस्य भयातभभोगसाधने<br>३.३ दशमलग्नसाधने<br>३.४ ससन्धिद्वादशभावसाधने<br>३.५ षड्वर्ग-कुण्डलीयुक्तजन्मपत्रिकालेखने |
| ४. जातकशास्त्रोक्तदिशा जातकस्य सामान्यफलकथने | ४.१ जातकस्य कुण्डलीमाधृत्य सामान्यफलकथने<br>४.२ दलाकृतियोगफलकथने<br>४.३ नवमांश-स्वक्षेत्रोच्च-नीचराशिगतग्रहफलविश्लेषणे<br>४.४ स्त्रीणां सौभाग्यपतिस्वरूपफलकथने |
| ५. ताजिकशास्त्रोक्तविधिना निर्दिष्टविषयाणां शुभाशुभफलकथने | ५.१ वर्षलग्नसाधने<br>५.२ पञ्चाधिकारिग्रहनिर्धारणे<br>५.३ त्रिपताकीचक्राधारेण फलकथने<br>५.४ त्रिराशिपतिविवेचने<br>५.५ सप्रयोजनमुन्थाफलकथने<br>५.६ विंशोत्तरीयोगिनीमुद्दादशाधारेण शुभाशुभफलविश्लेषणे |
| ६. प्रश्नशास्त्रानुसारं प्रश्नोत्तरणे | ६.१ प्रश्नलग्नकुण्डलीस्थग्रहस्थित्याधारेण शुभाशुभत्वविश्लेषणे<br>६.२ चिन्तितविषयकथने<br>६.३ हृतनष्टमुष्टिगतप्रश्नेषु धातुमूलजीवज्ञाने<br>६.४ चौरस्य वयःस्वरूपादिकथने<br>६.५ नष्टवस्तुनो लाभालाभकथने<br>६.६ गर्भस्थशिशोरवस्थानिर्धारणे<br>६.७ परदेशगतस्यागमनकालकथने |

## ४. विषयक्षेत्रं क्रमश्च

कक्षा ९

| क्र.सं. | विषयक्षेत्राणि / प्रकरणानि | विषयवस्तूनि | बोधः | अभिव्यक्तिः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १ | ज्योतिषसम्बद्धाधारभूतविषयज्ञानम् | १. पञ्चाङ्गपरिचयः<br>२. नक्षत्रस्वामिनः<br>३. ग्रहनक्षत्राणां स्थिरादिसंज्ञा<br>४. चन्द्रवासफलम्<br>५. ग्रहाणामुच्चनीचावस्थाः<br>६. ग्रहाणां मूलत्रिकोणम्<br>७. ग्रहाणामुदयास्तावस्थाः<br>८. ग्रहमैत्री<br>९. अवकहडाचक्रं तत्प्रयोगश्च<br>१०. सप्रयोजनं वरवधूमेलापकचक्रम्<br>११. पञ्चाङ्गाधारेण नवमांशवशेन विवाह-व्रतबन्धयोः समयनिर्धारणम्<br>१२. गोचरस्थशनिदशाफलम् | –पञ्चाङ्गज्ञानम्<br>– नक्षत्राणां स्थिरादिसंज्ञाज्ञानम्<br>– सूर्यादिग्रहाणामुच्चनीचत्रिकोणराशिज्ञानम्<br>–वरवधूमेलापकचक्राधारेण गुणनिर्धारणम्<br>–विवाहव्रतबन्धयोः समयनिर्धारणविधिज्ञानम्<br>–गोचरस्थशनिदशायाः शुभाशुभफलम् | –नेपालदेशीयपञ्चाङ्गमनुसृत्य तिथिनक्षत्रयोगकरणादिचयनम्<br>–नक्षत्राणां स्थिरादिसंज्ञानिर्धारणम्<br>–सूर्यादिग्रहाणामुच्चनीचत्रिकोण-राशिपरिशीलनम्<br>–वरवधूमेलापकचक्रावलोकनम्<br>–विवाहव्रतबन्धयोः समयनिर्धारणम्<br>–गोचरस्थशनिदशायाः शुभाशुभ-फलवर्णनम् | १६ |
| २ | मुहूर्तज्ञानम् | १. क्रयविक्रयमुहूर्तः<br>२. पशूनां प्रवेशयात्रातिथयः<br>३. आपणोद्घाटनमुहूर्तः<br>४. सेवामुहूर्तः<br>५. अभुक्तमूलम्<br>६. मूलाश्लेषनक्षत्रजननफलं तच्छान्तिश्च<br>७. आद्यरजोदर्शने शुभाशुभत्वविचारस्तच्छान्ति-विधिश्च<br>८. दन्तोत्पत्तिफलं तच्छान्तिविधिश्च<br>९. अन्नप्राशनमुहूर्तः | –मुहूर्तसम्बद्धतिथ्यादिज्ञानम्<br>–मुहूर्तसम्बद्धानां त्याज्यविषयज्ञानम्<br>– अशुभमुहूर्तजन्यदोषनिवारणाय शान्तिविधिज्ञानम्<br>– व्रतबन्धविवाहयोर्लग्नपत्रिकालेखनविधिज्ञानम् | –सम्बद्धमुहूर्तनिर्धारणम्<br>–ग्रहस्थितिविश्लेषणम्<br>–अशुभमुहूर्तजन्यदोषनिवारणाय शान्तिविधिकथनम्<br>–लग्ननवमांशाभ्यां समयनिर्धारणम्<br>–व्रतबन्धविवाहयोर्लग्नपत्रिका-लेखनम् | ३६ |

| | | | | | |
|---|---|---|---|---|---|
| | | १०. अन्नप्राशने लग्नशुद्धिः शुभाशुभफलञ्च<br>११. चूडामुहूर्तः<br>१२. चूडायां लग्नशुद्धिप्रकारः<br>१३. अक्षरारम्भमुहूर्तः<br>१४. उपनयनकालः<br>१५. उपनयने गुरुसूर्यचन्द्रशुद्धिविचारः<br>१६. उपनयनमुहूर्तः<br>१७. उपनयने ग्राह्याग्राह्यग्रहस्थितिः<br>१८. उपनयने निषिद्धकालः<br>१९. उपनयनकालिकलग्ननवमांशफलम्<br>२०. व्रतपत्रिका<br>२१. वैधव्ययोगः<br>२२. वैधव्ययोगपरिहारः<br>२३. कन्यावरणमुहूर्तः<br>२४. वरवरणमुहूर्तः<br>२५. विवाहे ग्राह्यमासाः<br>२६. विवाहे ग्राह्यतिथिवारनक्षत्राणि अभिजिन्नक्षत्रविचारश्च<br>२७. विवाहे लग्नशुद्धिः<br>२८. व्रतबन्ध-विवाहयोर्लग्नपत्रिके<br>२९. वधूप्रवेशमुहूर्तः<br>३०. द्विरागमनमुहूर्तः<br>३१. विवाहानन्तरं कन्यायाः प्रथमज्येष्ठादिमासादौ पत्यादिगृहे निवासफलम् | | | |
| ३ | जन्मपत्रिकानिर्माणम् | १. इष्टकालः<br>२. भयातभभोगसाधनम् | –इष्टकालानयनविधिज्ञानम्<br>–भयातभभोगानयनविधिज्ञानम् | –इष्टकालसाधनम्<br>–भयातभभोगसाधनम् | १६ |

| | | | | | |
|---|---|---|---|---|---|
| | | ३. चन्द्रस्पष्टीकरणम्<br>४. चालनानयनपूर्वकं ग्रहस्पष्टीकरणम्<br>५.सारणीतो लग्नसाधनम्<br>६. षड्वर्गपरिचयः<br>७. विंशोत्तरी-त्रिभागी-योगिनीदशान्तर्दशासाधनम्<br>८. सामान्यजन्मपत्रिका | –ग्रहस्पष्टीकरणप्रक्रियाज्ञानम्<br>–सारणीतो लग्नानयनविधिज्ञानम्<br>–नक्षत्रदशासाधनप्रक्रियाज्ञानम्<br>–सामान्यजन्मपत्रिकानिर्माणविधिज्ञानम् | –स्पष्टग्रहसाधनम्<br>–सारणीतोलग्नसाधनम्<br>–नक्षत्रदशासाधनम्<br>–जन्मपत्रिकानिर्माणम् | |
| ४. | जातकफलादेशः | १. भावस्य हानिवृद्धी<br>२. लग्नादिद्वादशभावाद् विचारणीया विषयाः<br>३. लग्नादिद्वादशभावस्थग्रहफलम्<br>४. विंशोत्तरीयोगिनीदशाफलम्<br>५. ग्रहस्थित्यनुरूपं जातकस्वरूपविचारः<br>६. बालारिष्टविचारः<br>७. पित्राद्यरिष्टविचारः<br>८.जातकस्यारिष्टविचारः | – भावस्य हानिवृद्धीज्ञानम्<br>– लग्नादिद्वादशभावाद् विचारणीयविषयज्ञानम्<br>–नक्षत्रदशाज्ञानम्<br>–कुण्डलीस्थग्रहाधारेण जातकस्वरूपज्ञानम्<br>–अरिष्टज्ञानम् | – भावस्य हानिवृद्धिकथनम्<br>– द्वादशभावानां विश्लेषणम्<br>– नक्षत्रदशाफलवर्णनम्<br>– जातकस्य स्वरूपकथनम्<br>– ग्रहस्थित्यनुरूपमरिष्टकथनम् | १६ |
| ५. | सामुद्रिकफलादेशः | १. हस्त-पाद-मुख-ललाट-कर्ण-नासिका-नयनानां फलविचारः<br>२. गोत्र-द्रव्य-आयु-यशो-विद्या-मातृ-पितृ-बन्धु-पत्नी-भाग्य-सन्तान-यात्रा-मणिबन्धानां रेखाणां फलविचारः<br>३. हस्तस्थग्रहाणां स्थानवशेन फलादेशः<br>४. हस्तपादस्थानां मीन-मकर-शङ्ख-पद्म-शैल-गज-रथ-वृष-चक्र-कूप-असि-अङ्कुश-कार्मुक-शर-च्छत्र-चामर-यव-मालाचिह्नानां फलविचारः | –हस्त-पाद-मुख-ललाट-कर्ण-नासिका-नयनानां लक्षणफलज्ञानम्<br>–गोत्र-द्रव्य-आयु-यशो-विद्या-मातृ-पितृ-बन्धु-पत्नी-भाग्य-सन्तान-यात्रा-मणिबन्धानां रेखाणां शुभाशुभलक्षणफलज्ञानम्<br>– –हस्तस्थग्रहाणां लक्षणफलज्ञानम्<br>–हस्तपादस्थमीन-मकर-शङ्ख-पद्म-शैल-गज-रथ-वृष-चक्र-कूप-असि-अङ्कुश-कार्मुक-शर-च्छत्र-चामर-यव-मालाचिह्नानां लक्षणफलज्ञानम् | –हस्त-पाद-मुख-ललाट-कर्ण-नासिका-नयनानां लक्षणानुरूपं फलविश्लेषणम्<br>–गोत्र-द्रव्य-आयु-यशो-विद्या-मातृ-पितृ-बन्धु-पत्नी-भाग्य-सन्तान-यात्रा-मणिबन्धानां रेखाणां शुभाशुभफलकथनम्<br>–हस्तस्थग्रहाणां स्थानवशेन फलविवेचनम्<br>–हस्तपादस्थानि मीन-मकर-शङ्ख-पद्म-शैल-गज-रथ-वृष-चक्र-कूप-असि-अङ्कुश-कार्मुक-शर-च्छत्र-चामर-यव-मालाचिह्नानां | १२ |

| | | | | | |
|---|---|---|---|---|---|
| | | | | शुभाशुभफलविश्लेषणम् | |
| सैद्धान्तिकाभ्यासः | | | | | ९६ |
| प्रयोगात्मकाभ्यासः | | | | | ३२ |
| योगः | | | | | १२८ |

**कक्षा १०**

| क्र.सं. | विषयक्षेत्राणि / प्रकरणानि | विषयवस्तूनि | बोधः | अभिव्यक्तिः | कार्य घण्टाः |
|---|---|---|---|---|---|
| १ | पञ्चाङ्गज्ञानम् | १. पलभाक्षांशदेशान्तरक्रान्त्यंश-चरखण्डानां परिचयः<br>२.नेपालदेशीयपञ्चाङ्गमनुसृत्य संवत्सर-संक्रान्ति-विषुवत्-ग्रहणफलविचारः<br>३. ग्रहाणां रत्नानि<br>४. गोचरफलम् | –पलभाक्षांशदेशान्तरक्रान्त्यंशचरखण्डबोधः<br>–नेपालदेशीयपञ्चाङ्गमनुसृत्य संवत्सर-संक्रान्ति-विषुवत्-ग्रहणफलज्ञानम्<br>–सूर्यादिग्रहाणां रत्नज्ञानम्<br>–गोचरपद्धतिज्ञानम्<br>–पञ्चाङ्गमाधृत्य सूर्यादिग्रहाणां गोचरफलबोधः | –पलभाक्षांशदेशान्तरक्रान्त्यंशचरखण्डानां परिचयप्रकाशनम्<br>–नेपालदेशीयपञ्चाङ्गमनुसृत्य संवत्सर-संक्रान्ति-विषुवत्-ग्रहणफलकथनम्<br>–सूर्यादिग्रहाणां रत्नकथनम्<br>–गोचरपद्धतिकथनम्<br>–सूर्यादिग्रहाणां गोचरफलविश्लेषणम् | १६ |
| २ | मुहूर्तशास्त्रम् | १. यात्रायां तिथिनक्षत्रशुद्धिः<br>२.दिक्शूलचक्रम्<br>३. यात्रायां शुभाशुभलग्नविचारः<br>४. तिथिदोहदम्<br>५. वारदोहदम्<br>६. नक्षत्रदोहदम्<br>७. दिग्दोहदम्<br>८. गृहारम्भे लग्नशुद्धिः<br>९. वृषवास्तुचक्रम्<br>१०. गृहारम्भमुहूर्तः<br>११. गृहारम्भे त्याज्यविषयाः | –मुहूर्तसम्बद्धतिथ्यादयः<br>–मुहूर्तानां त्याज्यविषयाः<br>–दिक्शूलचक्रबोधः<br>–तिथि-वार-नक्षत्र-दिग्दोहदज्ञानम्<br>–वृषवास्तुचक्रज्ञानम्<br>–कलशचक्रज्ञानम्<br>–राहोर्मुखज्ञानम् | –सम्बद्धमुहूर्तनिर्धारणम्<br>–ग्रहस्थितिविश्लेषणम्<br>–लग्ननवमांशाभ्यां समयनिर्धारणम्<br>–दिक्शूलकथनम्<br>–तिथि-वार-नक्षत्र-दिग्दोहदकथनम्<br>–वृषवास्तुचक्रविवेचनम्<br>–कलशचक्रविवेचनम्<br>–राहोर्मुखनिर्धारणम् | २८ |

| | | | | | |
|---|---|---|---|---|---|
| | | १२. राहुमुखविचारस्तत्फलञ्च<br>१३. गृहप्रवेशमुहूर्तः<br>१४. गृहप्रवेशे लग्नशुद्धिः<br>१५. कलशचक्रम् | | | |
| ३. | षड्वर्गकुण्डलीयुक्त-<br>जन्मपत्रिकानिर्माणं<br>तत्फलादेशश्च | १.चरबेलान्तरदेशान्तरसंस्कार-पूर्वकमिष्टकालसाधनम्<br>२.नक्षत्रस्य वृद्धिलोपादिविविधा-वस्थासु भयातभभोगयोः साधनविधिः<br>३. स्वदेशोदयसाधनविधिः<br>४. प्रथमलग्नानयनम्<br>५. नतोन्नतसाधनविधिः<br>६. दशमलग्नानयनम्<br>७. ससन्धिद्वादशभावसाधनरीतिः<br>८. भुक्तोनविंशोत्तरीयोगिनीदशा-साधनविधिः<br>९. जन्मपत्रिकानिर्माणम्<br>१०.अनफा-सुनफा-दुरुधरा-केमद्रुमयोगानां परिचयस्तेषां फलानि च<br>११. द्व्यादिग्रहयोगफलम्<br>१२.नवमांश-स्वक्षेत्र-उच्च-नीचराशिगतग्रहफलम्<br>१३. दलाकृतियोगस्य फलादेशः<br>१४. स्त्रीजातके सौभाग्यज्ञानं पतिस्वरूपज्ञानञ्च | –प्रामाणिकस्थानीयसमयान्तरपूर्वकम् इष्टकालानयनप्रक्रियाज्ञानम्<br>–विविधावस्थासु नक्षत्रस्य भयातभभोगयोः गणनाविधिज्ञानम्<br>–लग्नसाधनप्रक्रियाज्ञानम्<br>–नतोन्नतसाधनप्रक्रियाज्ञानम्<br>–दशमलग्नसाधनप्रक्रियाज्ञानम्<br>–ससन्धिद्वादशभावसाधनविधिज्ञानम्<br>–भुक्तोननक्षत्रदशासाधनप्रक्रियाज्ञानम्<br>–षड्वर्गकुण्डलीयुक्तजन्मपत्रिकालेखनज्ञानम्<br>–अनफा-सुनफा-दुरुधरा-केमद्रूमयोगानां फलज्ञानम्<br>–द्व्यादिग्रहयोगफलज्ञानम्<br>–नवमांश-स्वक्षेत्र-उच्च-नीचराशिगतग्रहफलज्ञानम्<br>–दलाकृतियोगफलज्ञानम्<br>–स्त्रीणां सौभाग्यपतिस्वरूपफलज्ञानम् | –प्रामाणिकस्थानीयसमयान्तरसंज्ञानपूर्वकम् इष्टकालसाधनम्<br>–विविधावस्थासु नक्षत्रस्य भयातभभोगयोः साधनम्<br>–प्रथमलग्नसाधनम्<br>–नतोन्नतसाधनम्<br>–दशमलग्नसाधनम्<br>–ससन्धिद्वादशभावसाधनम्<br>–भुक्तोननक्षत्रदशासाधनम्<br>–षड्वर्गकुण्डलीयुक्तजन्मपत्रिकानिर्माणम्<br>–अनफा-सुनफा-दुरुधरा-केमद्रूमयोगानां फलकथनम्<br>–द्व्यादिग्रहयोगफलकथनम्<br>–नवमांश-स्वक्षेत्र-उच्च-नीचराशिगतग्रहफलकथनम्<br>– दलाकृतियोगफलकथनम्<br>– स्त्रीणां सौभाग्यपतिस्वरूपफलकथनम् | २४ |
| ४ | ताजिकशास्त्रम् | १. वर्षलग्नसाधनरीतिः<br>२. सप्रयोजनं पञ्चाधिकारि-ग्रहज्ञानप्रकारः<br>३. वर्षेशनिर्णयस्तदाधारेण | – वर्षलग्नानयनप्रक्रियाज्ञानम्<br>– पञ्चाधिकारिग्रहबोधः<br>– त्रिपताकीचक्राधारेण फलादेशज्ञानम् | – वर्षलग्नसाधनम्<br>– पञ्चाधिकारिग्रहनिर्धारणम्<br>– त्रिपताकीचक्राधारेण फलकथनम् | १६ |

| | | | | | |
|---|---|---|---|---|---|
| | | फलादेशविधिश्च<br>४. त्रिपताकीचक्राधारेण फलादेशः<br>५. त्रिराशिपतिज्ञानविधिस्तत्फला देशश्च<br>६. सफलं मुन्थाज्ञानविधिः<br>७. विंशोत्तरीयोगिनीमुद्दादशानां फलादेशः | – त्रिराशिपतिज्ञानम्<br>– सप्रयोजनं मुन्थाज्ञानम्<br>– विंशोत्तरीयोगिनीमुद्दादशानां फलज्ञानम् | – त्रिराशिपतिविवेचनम्<br>– सप्रयोजनं मुन्थाफलकथनम्<br>– विंशोत्तरीयोगिनीमुद्दादशानां फलविश्लेषणम् | |
| ५. | प्रश्नशास्त्रम् | १. प्रश्नकुण्डल्यां भावस्य शुभाशुभत्वम्<br>२. चिन्तितविषयज्ञानोपायः<br>३.हृतनष्टमुष्टिगतप्रश्नेषु धातुमूलजीवविचारः<br>४. चौरज्ञानप्रकारः<br>५. नष्टवस्तुनो लाभालाभज्ञानम्<br>६. नष्टवस्तुनो दिग्ज्ञानविधिः<br>७. तस्करस्य स्वरूपज्ञानविधिः<br>८. गर्भे पुत्रपुत्रीज्ञानोपायाः<br>९. परदेशगतस्यागमनकालः | –भावस्यशुभाशुभत्वबोधः<br>–चिन्तितविषयज्ञानम्<br>–हृतनष्टमुष्टिगतप्रश्नेषु धातुमूलजीवज्ञानम्<br>–चौरस्य वयःस्वरूपादिबोधः<br>–नष्टवस्तुनो लाभालाभज्ञानम्<br>–गर्भस्थशिशोरवस्थाज्ञानम्<br>–परदेशगतस्यागमनकालज्ञानम् | –ग्रहस्थित्यनुरूपं भावस्य शुभाशुभत्व-विश्लेषणम्<br>–चिन्तितविषयकथनम्<br>–हृतनष्टमुष्टिगतप्रश्नेषु धातुमूलजीवकथनम्<br>–चौरस्य वयःस्वरूपादिकथनम्<br>–नष्टवस्तुनो लाभालाभकथनम्<br>–गर्भस्थशिशोरवस्थानिर्धारणम्<br>–परदेशगतस्यागमनकालकथनम् | १२ |
| सैद्धान्तिकाभ्यासः | | | | | ९६ |
| प्रयोगात्मकाभ्यासः | | | | | ३२ |
| योगः | | | | | १२८ |

**५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च**

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्कभारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | ➢ विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>➢ जातकफलादेशविषये मनन-चिन्तन-प्रश्नोत्तर-सामूहिकविमर्शनादि-कक्षागतशिक्षणसहभागिता |

| | | | | |
|---|---|---|---|---|
| २. | कक्षाकार्यं परियोजनाकार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | ➢ पञ्चाङ्गमुहूर्तजातकसामुद्रिकप्रश्नताजिकसम्बद्धा लिखिता मौखिकी च प्रस्तुतिः,<br>➢ जन्मपत्रिकानिर्माणसम्बद्धं प्रश्नोत्तरलेखन-विमर्शन-तात्पर्यस्फुटीकरणानि<br>➢ गृहकार्यं कक्षाकार्यं वा<br>➢ सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च<br>➢ अधीतानां विषयाणामनुसरणं दैनन्दिनव्यवहारे प्रदर्शनञ्च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ५ | पञ्चाङ्ग-मुहूर्तपरक-व्यावहारिकविषयाः, जातकफलादेशः, अशुभनक्षत्रजननशान्तिविधिः, सामान्यजन्मपत्रिका, तदनुरूपं फलादेशः सामुद्रिकशास्त्रोक्तफलादेशश्च<br>*वा*<br>पञ्चाङ्ग-मुहूर्तपरक-व्यावहारिकविषयाः, प्रश्नशास्त्रोक्तफलादेशः, ताजिकशास्त्रोक्तफलादेशः, षड्वर्गकुण्डलीयुक्तजन्मपत्रिका, जातकशास्त्रोक्तफलादेशश्च |
| | | (ख) अभिव्यक्तिः | ५ | पञ्चाङ्ग-मुहूर्तपरक-व्यावहारिकविषयाः, जातकस्य फलादेशः, अशुभनक्षत्रजननशान्तिविधिः, सामान्यजन्मपत्रिका, तदनुरूपं फलादेशः सामुद्रिकशास्त्रोक्तफलादेशश्च<br>*वा*<br>पञ्चाङ्ग-मुहूर्तपरक-व्यावहारिकविषयाः, प्रश्नशास्त्रोक्तफलादेशः, ताजिकशास्त्रोक्तफलादेशः, विशेषजन्मपत्रिका, जातकशास्त्रोक्तफलादेशश्च |
| ४. | त्रैमासिकपरीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| **योगः** | | | **२५** | |

## ६. शिक्षणसहजीकरणप्रक्रिया

अस्माकं सनातनधर्मावलम्बिनां दैनिकव्यवहारे फलितज्योतिषस्य विशिष्टं महत्त्वं वर्तते । फलितज्योतिषं विना संस्काराणां, यात्राणां, व्रतोपवासादीनां, पर्वणाञ्च शुभसमयज्ञानं न भवति । अत्र समाविष्टानां फलितज्योतिषसम्बद्धानां विषयवस्तूनामध्ययनक्रमे समागतानां विषयाणां क्षेत्राणाञ्च समानं महत्त्वमस्ति । अतस्ते सर्वेऽपि विषयाः समानमहत्त्वरूपेण अध्यापनीया भवन्ति । एतेषां सम्बद्धविषयवस्तूनां सहजीकरणपूर्वकं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षस्य च विकासः परमावश्यकः । शैक्षिक-विकासानुरूपौ चिन्तनव्यवहारावस्य विषयस्य मुख्योद्देशकौ च वर्तेते । फलितज्योतिषशिक्षणविधौ विषयक्षेत्रगतशिल्पविकासायाध्ययनसहजीकरणप्रक्रिया अपरिहार्या मन्यते । अस्यां स्थितौ छात्रकेन्द्रितक्रियाकलापस्य महत्त्वं सर्वातिशायि भवति । छात्रकेन्द्रितक्रियाकलापस्तु पाठ्यक्रमस्योद्देश्ये, विषयवस्तुषु, छात्राणां पृष्ठभूमौ चाऽऽधृतो भवति । अध्ययनस्य सहजीकरणं सामूहिके वैयक्तिके चाभ्यासे आश्रितं भवति । पाठ्यक्रमस्यास्योद्देश्यानां परिपूर्तयेऽधोलिखिता अध्ययनसहजीकरणप्रक्रिया उपयुक्ता भविष्यति ।

१. शिक्षकेण वार्षिकीमर्धवार्षिकीं मासिकीमर्धमासिकीं साप्ताहिकीं दैनिकीञ्च शिक्षणयोजनां पाठ्यांश-शिक्षणयोजनां दैनिकीं पाठयोजनां च निर्माय तदनुसारं शिक्षणीयम् ।
२. शिक्षणे विशेषरूपेण विद्यार्थिकेन्द्रितः शिक्षणविधिरवलम्बनीयः ।
३. छात्रेभ्यो विषयवस्तुगतामभिरुचिमुत्प्रेरणाञ्च जागरयितुमुपयुक्तवातावरणं निर्माय ततो विषयशिक्षणं कार्यम् ।
४. विद्यार्थिनां स्तरं वयोऽभिरुचिं च ज्ञात्वा सरलया प्रक्रिययाऽध्यापनीयम् ।
५. मुहूर्तशास्त्रस्याध्यापनात्पूर्वं तत्र प्रयोज्यमानानां तिथि-वार-नक्षत्र-योग-करणायनर्तुमासादिविषयाः परिचेतव्याः ।
६. प्रचलितपञ्चाङ्गस्य साहाय्येन तिथ्यादीनां भोग्यघट्यादिज्ञाने, ग्रहाणां वक्रमार्गादिज्ञाने, ग्रहावस्थितराशिज्ञाने, ग्रहोदयास्तज्ञाने च छात्राः प्रशिक्षणीयाः । व्याख्यानेनोदाहरणेन, विश्लेषणेन व्यतीतोदाहरणदर्शनेन, पञ्चाङ्गप्रदर्शनेन च सम्बद्धविषयाः आकर्षकशैल्या शिक्षणीयाः ।
७. जातकशास्त्रस्याध्यापनात् पूर्वं राशि-राशिस्वामि-लग्न-होरा-द्रेष्काण-नवमांश-द्वादशांश-त्रिंशांश-मूलत्रिकोण-ग्रहमैत्री-ग्रहदृष्टि-नीचादिका जातकसम्बद्धविषया सोहाहरणं सकुण्डलीकमध्यापनीयाः । जातकग्रन्थस्य यः श्लोकः पाठनीयो भवति, प्रथमं तच्छ्लोको लेखनीयस्ततश्च गति-यति-लयपूर्वकं शुद्धमुच्चार्य तत् पद्यं मधुरस्वरेणादर्शपाठपूर्वकं पठनीयम् । ततः श्लोकानुगतमन्वयमन्वयानुगतं वर्णनम्, विश्लेषणम्, कुण्डलीप्रदर्शनम्, सारांशनिदर्शनञ्च कार्यम् ।
८. सामुद्रिकशास्त्रस्याध्यापनक्रमे तत्र प्रयुक्ता शरीरस्थचिह्नविशेषाः चित्रपटमाध्यमेन प्रदर्शनीयाः ।
९. प्रश्नशास्त्रस्याध्यापनक्रमे तत्सम्बद्धविषयाः कुण्डलीप्रदर्शनपूर्वकमध्यापनीयाः ।
१०. यस्य कस्यापि बालकस्य अथवा बालिकाया यज्जन्मस्थानं भवति, प्रथमं मानचित्रेऽथवा गोलीयमानचित्रे तत् स्थानमङ्कनीयम् । तत्पश्चाच्च मानचित्रस्य साहाय्येन तस्य स्थानस्याक्षांशो देशान्तरम्, प्रामाणिकं समयान्तरं वेलान्तरञ्च समवगत्य प्रचलितपञ्चाङ्गस्थसारणीसाहाय्येन चरपलानि ज्ञात्वा तत्संस्कारेण सूर्योदयमानं साध्यम् । तस्माच्च स्वेष्टकालं परिज्ञाय तदाधारेण जन्मस्थानीयान् स्पष्टग्रहान् जन्मस्थानीयं लग्नं पञ्चाङ्गादिकञ्च समानीय प्रथममेका जन्मपत्रिका छात्राणां पुरतोऽध्यापकेनैव निर्मेया । ततश्चैतादृशमन्यमेतद् भिन्नं भिन्नं जन्मस्थानं परिकल्प्य भिन्न-भिन्नजन्मपत्रिकानिर्माणे विद्यार्थिनो गृहकार्ये प्रेरयितव्याः । विद्यार्थिनिर्मितामेतादृशीं निदर्शनजन्मपत्रिकां समीक्ष्यावश्यकं संशोधनं विधाय सा जन्मपत्रिकाभिलेखरूपेण संरक्षणीया ।
१२. एवमेव कमपि क्रियात्मकमध्ययनं परिकल्प्य विद्यार्थिभिः प्राप्ता अङ्काः सम्बद्धस्थाने परीक्षानियमानुसारं यथासमयं प्रेषणीयाः ।

## ७. मूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धेः परिष्काराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयोरवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य परिष्काराय च सहजीकरणक्रियाकलापस्याभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिभिर्ज्ञानं प्राप्तं नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा योग्यतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेनैतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । बाह्यमूल्याङ्कनक्रमे लिखितपरीक्षा सञ्चाल्यते । विद्यार्थिमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरानुगतयोग्यतानाम्, कक्षागतशिक्षणोपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धशिल्पस्य, शिक्षणसहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् । स्तरस्यास्य विद्यार्थिमूल्याङ्कनप्रक्रिया सम्प्रति प्रचलिताक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते ।

**(क) आन्तरं मूल्याङ्कनम्**

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । फलितज्योतिषस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनायाधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अत्र क्रमे कक्षाकार्य-गृहकार्य-कक्षासहभागिता-प्रकरणपरीक्षा-पाक्षिकपरीक्षा-मासिकपरीक्षामाध्यमेन विद्यार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलविद्यार्थिभ्यो व्यावहारिकपरिवर्तनाय तेषां कृते शिक्षणकार्यस्य सहजीकरणायोपयुक्तवातावरणनिर्माणं क्रियते । तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये सामूहिकविमर्शन-मौखिकपरीक्षा-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षणप्रभृति-कार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन विद्यार्थिनां योग्यतावृद्धिर्भवेत् ।

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| **क्र.सं.** | **क्षेत्रम्** | **अङ्कभारः** |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकी परीक्षा | ६ |
| | **योगः** | **२५** |

पाठ्यक्रमस्योद्देश्यानुरूपं ज्ञानं विद्यार्थिभ्यो प्रापितं नवेति स्पष्टीकरणार्थमावधिकरूपेण मूल्याङ्कनं कृत्वा छात्राणां योग्यतानिर्धारणं क्रियते । स्तरोन्नतये कक्षोन्नतये च शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । प्रायशस्त्रैमासिकपरीक्षारूपेण षाण्मासिकपरीक्षारूपेण वार्षिकपरीक्षारूपेण च तादृशो निर्णयः क्रियते ।

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानं शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

## विशिष्टीकरणतालिका

**कक्षा : १०** **पूर्णाङ्काः ७५** **समयः घण्टात्रयम्**

| क्र. स. | विषयक्षेत्रम् | प्रश्नप्रकृतिः | ज्ञानम् | | | बोधः | | | शिल्पम् | | | उच्च- दक्षता | | | प्रष्टव्याः प्रश्न सङ्ख्याः | अङ्क भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | पञ्चाङ्गज्ञानम् | ज्ञान-बोध-उच्चदक्षतात्मकम् | २ | - | - | २ | - | - | - | - | - | - | - | ८ | ५ | १२ | **ज्ञानबोध**क्षेत्रतः- परिभाषा तथा ग्रहरत्नसम्बद्धं लघुप्रश्नचतुष्टयम् **उच्चदक्षता**क्षेत्रतः - ग्रहरत्न-गोचरफल-सम्बद्ध एकः प्रश्नः |
| २. | मुहूर्तज्ञानम् | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मकम् | १ | - | - | १ | - | - | - | १० | - | - | - | ८ | ५ | २० | **ज्ञानबोध**क्षेत्रतः- यात्रासम्बद्धं लघुप्रश्नद्वयम् **शिल्प**क्षेत्रतः- यात्राप्रकरणसम्बद्धं प्रश्नद्वयम् **उच्चदक्षता**क्षेत्रतः - वास्तुप्रकरणसम्बद्धो व्याख्यात्मक एक प्रश्नः |
| ३. | षड्वर्ग-कुण्डलीयुक्त-जन्मपत्रिका-निर्माणम्, तत्फलादेशश्च | ज्ञान-बोध-प्रयोगात्मकम् | ३ | - | - | २ | - | - | - | १५ | - | - | - | - | ८ | २० | **ज्ञानबोध**क्षेत्रतः- स्त्रीजातक-नवमांश-स्वक्षेत्र-उच्च-नीचराशिगतग्रहसम्बद्धं लघुप्रश्नपञ्चकम् **शिल्प**क्षेत्रतः- षड्वर्ग-कुण्डली- |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | सहितजन्मपत्रिकानिर्माणं तत्फलादेशसम्बद्धं प्रश्नत्रयम् |
| ४. | ताजिकशास्त्रम् | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मकम् | - | - | - | - | - | - | - | ५ | - | - | - | ८ | २ | १३ | **शिल्प**क्षेत्रतः- मुन्था-मुद्दाज्ञानविधिस्तथा तत्फलादेशसम्बद्ध एक प्रश्नः **उच्चदक्षता**क्षेत्रतः पञ्चाधिकारी-त्रिपताकी-त्रिराशिपतिज्ञानविधिस्तथा तत्फलविवेचनसम्बद्ध एक प्रश्नः |
| ५ | प्रश्नशास्त्रम् | ज्ञान-बोध-प्रयोगात्मकम् | - | - | - | - | - | - | - | १० | - | - | - | - | २ | १० | **शिल्प**क्षेत्रतः- प्रश्नविषयकं व्याख्यात्मकं प्रश्नद्वयम् |
| योगः | | | ६ | | | ५ | | | | ४० | | | | २४ | २२ | ७५ | |

**द्रष्टव्यः** 'क' इत्यनेन अतिलघुप्रश्नो बोध्यः ।

'ख' इत्यनेन लघुप्रश्नो बोध्यः ।

'ग' इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः।

**पुनश्च** - ज्ञानबोधक्षेत्रात् विकल्परहिताः प्रश्नाः प्रष्टव्याः । शिल्पक्षेत्रात् यथेच्छप्रकरणतः प्रश्नद्वयं संयोज्य आहत्य दशप्रश्नाः प्रष्टव्याश्चेद् उच्चदक्षताक्षेत्राद् यथेच्छप्रकरणत एकं प्रश्नं संयोज्य आहत्य चत्वारः प्रश्नाः प्रष्टव्याः । आहत्य तेषु दशसु छात्रैरष्टौ प्रश्नाः समाधेयाश्चेच्चतुर्षु त्रयः प्रश्नाः समाधेयाः ।

## आदर्शप्रश्नपत्रम्

**कक्षा १०**

**समयः– घण्टात्रयम्** **पूर्णाङ्काः ७५**

### समूहः 'क'

**सर्वे प्रश्नाः समाधेयाः ।** **११ × १ = ११**

१. किन्नाम देशान्तरम् ?
२. नेपालदेशीया प्रचलितपलभा कति ?
३. बृहस्पतेः किं रत्नम् ?
४. का नाम क्रान्तिः ?
५. पूर्वदिग्गमने को दिग्दोहः ?
६. यात्रायां शुभदा मासाः के ?
७. स्त्रीणां पतिस्वरूपं कस्माद् भावात् विचार्यते ?
८. कदा स्त्री मनुजाकृतिर्भवति ?
९. द्विस्वभावराशिषु जाता स्त्री कीदृशी भवति ?
१०. मेषनवमांशे जातो जातकः कीदृशो भवति ?
११. स्वगृहस्थैः पञ्चग्रहैर्जायमानं फलं किम् ?

### समूहः 'ख'

**अष्टौ प्रश्नाः समाधेयाः ।** **८×५=४०**

१२. यात्रायां शुभदायिनी ग्रहस्थितिर्का ?
१३. यात्रायां योगिनीज्ञानोपायः कः ?
१४. अभीष्टस्थाने मेषादीनामुदयमानसाधनप्रकारं विलिखत ।
१५. यत्र इष्टघटी = १०।३०, स्पष्टसूर्यः = ४।२३।४१।५७ अयनांशाः = २४।२९।२५ तत्रेष्टस्थानस्य कृते प्रथमलग्नं साधयत ।
१६. दलयोगस्य लक्षणफलं वर्णयत ।
१७. मुन्थाज्ञानोपायः कः ?
१८. भावस्य शुभाशुभत्वं कथं ज्ञेयम् ?
१९. गर्भस्य पुत्रपुत्रीज्ञानोपायं विलिखत ।
२०. अपहृतस्य वस्तुनः धातुमूलजीवज्ञानोपायः कः ?
२१. केमद्रुमयोगस्य लक्षणफले वर्णनीये ?

### समूहः 'ग'

**त्रयप्रश्नाः समाधेयाः ।** **३× ८= २४**

२२. जन्मराशितोऽष्टमस्थशनिफलं वर्णयत ।
२३. वृषवास्तुचक्रस्य किं प्रयोजनम् ? एतत् कथं विचार्यते ?
२४. वर्षेशनिर्णयप्रकारं सोदाहरणं वर्णयत ।
२५. गृहप्रवेशमुहूर्तः कः ?

**समाप्तम्**